Journal
of the
Oriental Institute
M.S. University of Baroda

Vol. XLIX, Nos. 3-4
March - June, 2002

THE *ṚJUBHĀṢYA* ON THE *ŚUKLA YAJURVEDA*

MUKUND WADEKAR* and MILIND JOSHI*

[This is in continuation of our previous article, published in the Journal of the Oriental Institute, Vol-49, nos. 1-2, pp. 7-26]

शुक्लयजुर्वेदः -ऋजुभाष्यम् ।

एकत्रिंशोऽध्यायः ।

स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः सहस्र॑पात् ।
भूमिं॑ ᳪ स॒र्वत॑ स्पृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम् ॥ १ ॥

ॐ नमो वेदपुरुषाय । परमात्मा विज्ञानानन्दादिगुणनिध्यात्मभूतपुरुषमेधः । प्रजापतिः उत्पत्तिस्थितिसंहृतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो ज्ञानकर्मसमुच्चयकारी प्रकटयज्ञावताररूपः । 'सहस्रशीर्षा' इत्यनुवाकेन षोडशर्चेन अनुष्टुभेन त्रिष्टुबन्ते 'ब्रह्मणे ब्राह्मणम्' (शु.य.३०.५) इत्याद्यवयवभूतः पुरुषद्वारेण अवयवी स्तूयते । इदानीं श्रुत्यर्थवचनद्वारेण दृढयितुमाह । अथ स्यात्पुरुषमेधिकः रूपः 'अयमेव पुरुषो योऽयं पवते योऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य यदेषु लोकेष्वन्नन्तदस्यान्नं मेधः (बृ.उ. १३.६.२.१) । अथ विनियोगः नियुक्तान् पुरुषान् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति । 'सहस्रशीर्षा पुरुष' इत्यादि । इदानीमर्थं विवृणोति । 'इच्छमसीच्छमसि' इत्युपस्तौतीत्युपस्तौत्येवैनमेतद्गुणगुण्यभिधानं स्तुतिरिति पूर्वव्याख्या । आत्मनःपरितोषद्वारेण द्वितीयं व्याख्यानं करोति । यथा एवैष तथा एवैनमेतदाह । 'सहस्र' 'सहस्र'शब्दो बहुनाम संख्यावचने हि गृह्यमाणः । 'सहस्राक्ष' इत्यत्र द्वे सहस्रे स्याताम् । 'शीर्षं छन्दसि' (पा.सू. ६/१/६०) इति शीर्षन्नादेशः । पुरुषः पूरयिता विज्ञानत्वेनानन्दः सर्वगतः सर्वशक्तिः अनादिनिधनः पुरुषः । शिरोग्रहणं सर्वावयवविलक्षणार्थं न । सहस्राक्षग्रहणं विज्ञानेन्द्रियोपलक्षणार्थम् ।

---

* Oriental Institute, M.S. University of Baroda, Vadodara.

Journal of The Oriental Institute, Vol. 49, Nos. 3-4, March - June, 2000 Issue pp. 269-296

सहस्रशब्दोऽनन्तवचनः । सहस्रपात् 'संख्या[सु]पूर्वस्य' (पा.सू. ५/४/१४०) इत्यत्र लोपः । कर्मेन्द्रियोपलक्षकम् । सोऽयं भूमिराध्यरोपलक्षिको भूमिशब्दः त्रैलोक्यं सर्वतस्तिर्यगूर्धमधश्चैव स्पृत्वा व्याप्य दशाङ्गुलमत्यतिष्ठत् । अतिक्रम्य स्थितः । नाभेरारभ्य दशाङ्गुलमतिक्रम्य स्थितः । ब्रह्मरूपत्वात् । उक्तं च । 'कतम आत्मा' (बृह. ४/३/७) इत्युपक्रम्य 'योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः (बृह. ४/३/७) इति । विज्ञानात्मनो हृदयस्थानं कर्मफलोपभोगार्थम् । अन्तर्यामिनः स्तुतिर्नियन्तृत्वेन स्तुवन्ति । उक्तं च यद् - 'द्वा सुपर्णा सयुजा' (मुण्डक.३/१/१) ॥१॥

पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

यद्वर्तमानकालसम्बद्धं स्थावरजङ्गमम् । यद्भूतं यच्च उत्पन्नं अतिक्रान्तं यच्च भाव्यं भव्यं यच्च भविष्यत् । तत् सर्वं पुरुष एवावधार्यते । 'सर्वं खल्विदं ब्रह्मोपासीत' (छांद.३/१४/१) इति स्वभावः उतापि च अतीतानागतवर्तमानस्य जगतोऽ मृतत्वस्येशानः मोक्षदः । यो हि अमरणधर्मस्येश्वरो भवति नासौ मृयत इत्यभिप्रायः । यच्च अन्नेन अन्नरूपेण अतिरोहति प्ररोहति । उत्पत्तिं स्थितिं च प्राप्नोति । यः ब्रह्मादिस्तम्बपर्यन्तो भूतग्रामस्तस्य सर्वस्य स एव ईश्वर इत्यर्थः । 'इतः प्रदानाद्धि देवा उपजीवन्ति, इति ॥ २ ॥

एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

यदिदमतीतानागतवर्तमानकालसम्बन्धं प्राणिजातं एतावानस्य पुरुषस्य महिमा विभूतिः प्रभावः ऐश्वर्यं शक्तिरिति पर्यायाः । अतः महिम्नो ज्यायान् महत्तरः बहुतरश्च पुरुषः एवं सामान्यतः उक्त्वा इदानीं विशेषो दर्शयति । अस्य पुरुषस्य पादः विश्वानि भूतानि अतीतानागतवर्तमानानि भाञ्जि । यत्तु त्रिपात्त्वमस्य पुरुषस्य अमृतं अमरणधर्मि । त्रिपाच्छब्देन विज्ञानमानन्दमुक्तं स्यात् । तथा हि 'वेनस्तत्पश्यन्निहितम्' (शु.य.३२/८) उपक्रम्य 'प्र तद्वोचे' (शु.य. ३२/९) इत्यभिधाय 'त्रीणि पदानि गुहायाम्' (शु. य. ३४/४३) इत्याह । दिवि द्योतते स्वमहिम्नि तिष्ठति । उक्तं च - केचित्त्रिपाच्छब्देनादित्यं वर्णयन्ति । स हि ऋग्यजुःसाममयः । यद्वा यद्योगिभिरात्मतत्त्वेन ध्येयम् । 'यदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा' (बृह. २/५/१९) 'विज्ञानमानन्दं ब्रह्म' (बृह. ३/९/२८) इत्येवमादिभिः वाक्यैः प्रतिपादितम् । तत्त्रिपाद्युक्तम् । ये गुणाः सत्यसंकल्पादयः ते दिवीत्युक्ताः ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

इदानीं परमात्मनो निःश्वासप्रश्वासभूतावुपसंहारावुच्येते । स्थितिजीविती च । यदि त्रिपात्पुरुषः त्रयो हि तस्य पादाः सर्गस्थितिप्रलयलक्षणाः स ऊर्द्ध्वं उदैत् उपसंहारकाले इति वाक्यशेषः । ऊर्द्ध्वमिति क्रियाविशेषणम् । स्थूलानि सूक्ष्मेषु सूक्ष्माणि सूक्ष्मतरेषु एवमात्मा प्रतिष्ठितो भवति । पुनः सर्गकाले अस्य पुरुषस्य पाद इह अभवत् । पुनर्ग्रहणमावृत्तीनामानन्त्यं गमयति । ततः पादात् विष्वङ् बहुरूपं तिर्यगूर्द्धं अधश्चैव व्याक्रामत् । सर्वप्राणिनां कारणभूतं व्याप्नोत् । साशनानशने प्राणिजाते अभिरूपेण कर्मणा व्याक्रामत् व्याप्नोत् । इति हिरण्यगर्भनिर्देशः ॥ ४ ॥

ततो॑ वि॒राड॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

तस्मात् हिरण्यगर्भात् विराडजायत । हिरण्यगर्भो लिङ्गशरीरः । ततो विराडजायत । विराट्पुरुषविधः । विराजः सकाशात्पुरुषो मनुरजायत । स च मनुजूतिः सन् भूमेरत्यरिच्यत भूमेरतिरिक्तोऽभूत् । पश्चाद्भूमिं भूमिशब्दो वंशोपलक्षणार्थः । हिरण्यगर्भो हि एकाकी विराडप्येकाकी मनुरप्येकाकी तस्यापत्यानि बहूनि एतदभिप्रायम् । अथो पुरः अथो अत्र भविष्यत्कालभाविभ्यः अतिरिच्यते[इ]त्यनुषङ्गः । अत्र बहून्यपत्यानि व्याख्यातानि विद्यन्ते ग्रन्थविस्तरभयान्नोच्यन्ते ॥ ५ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒ संभृ॑तं पृषदा॒ज्यम् ।
प॒शूंस्तांश्च॑क्रे वाय॒व्या॒नार॒ण्या ग्रा॒म्याश्च॒ ये ॥ ६ ॥

इदानीं देशकालकर्तृसाधनफलभूतो यज्ञसर्गः आदावुच्यते । तस्मात् पुरुषमेधाख्यात् यज्ञात् सर्वहुतः सर्वस्मिन् हूयत इति सर्वहूर्यज्ञः । तस्मात्सर्वहुतः । तथाभूतं हविः संभृतं पृषदाज्यम् । यदुद्धृतं यत्कर्तृभूतं तान् पशून् वायव्यान् चक्रे कृतवान् । विभक्तिव्यत्ययः आरण्यान् ग्राम्यांश्च यान् इति समञ्जसम् । यतस्ते पृषदाज्यादुत्पन्नाः तेभ्यः क्षीरादि भवति ॥ ६ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दां॑ ᳪसि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ७ ॥

सर्वहुतः इति व्याख्यातम् । ऋचः सामानि जज्ञिरे । छन्दांसि गायत्र्यादीनि जज्ञिरे जातानि । तस्मात्पुरुषमेधाख्याद्यज्ञाद्यजुरजायत । न हि एतैर्विना यज्ञाः सिध्यन्ति ॥ ७ ॥

तस्मा॒दश्वा॑ अजायन्त॒ ये के चो॑भ॒यादतः॑ ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ ॥८॥

तस्मात्पुरुषमेधादश्वा अजायन्त । पुनः ये के च अश्वेतर गर्दभादयः उभयादतः । ऊर्ध्वाधोभागे दन्तयुक्ताः । गावश्च जज्ञिरे । तस्मादजाः अवयः । न हि पशुभिर्विना यज्ञसृष्टिः सिध्यति ॥८॥

तं य॒ज्ञं बर्हि॑षि॒ प्रौक्ष॒न्पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये ॥ ९ ॥

यज्ञसाधनभूतं पुरुषमग्रतो जातं बर्हिषि व्यवस्थितं प्रौक्षन् प्रोक्षति । तत्र श्रुतिः- 'यान्वैतां सप्तपुरुषानेकं पुरुषमकुर्वन्, इत्युपक्रम्य 'स एतं लोकमगच्छत' (कौषीतकि.१/३) इत्यभिधाय देवयज्ञेनैव यष्टुमद्रियन्त । तस्मादेतदृषिणाभ्यनूक्तं- 'यज्ञेन यज्ञमयजन्त देवा' (शु.य.३१/१६) इति । तेन पुरुषेण देवता अयजन्त साध्याः । प्रजापतेः प्राणाः ऋषयश्च मरीचिप्रभृतयः ॥ ९ ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥ १० ॥

इदानीं पुरुषमेधयाजिनः फलपरिणामो विराड्रूपेणोच्यते । पुरुषस्य नारायणे वा फलपरिणामः चतसृभिः कण्डिकाभिरस्ति । यदा पुरुषं विहितवन्तः उपस्थितं कालाः तदा कतिधा कतिप्रकारं व्यकल्पयन् । कल्प्यमानस्य किं मुखमासीत् । कौ बाहू आस्ताम् । किं च ऊरू स्ताम् । किं पादौ उच्येते । अथ वर्णसृष्टिं प्रतिप्रश्नभूतामृचमाह ॥ १० ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या ५ शूद्रो अजायत ॥ ११ ॥

अस्य पुरुषस्य मुखं ब्राह्मण आसीत् । अस्य बाहू राजन्यः कृत आसीत् । तदस्य ऊरू यद्वैश्यः यत्तदोर्व्यत्ययः । अस्य पुरुषस्य यौ ऊरू वैश्यः कृत आसीदित्यध्याहारः । पद्भ्यां शूद्रो अजायत ॥ ११ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

इदानीं देवतासृष्टिं प्रतिपादयति । चन्द्रमा मनसो जातः । विपरीतोऽत्र करणमार्गः । चक्षोः सूर्यो अजायत । चक्षोरिति लिङ्गव्यत्ययः । श्रोत्राद्वायुश्च प्राणश्चननु प्राणाद्वायोरुत्पत्तिः श्रूयते । कथं एतत्पुरुषस्य सृजतः स्वेच्छया कार्यकारणभावः । मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्ष५ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ ॥ अकल्पयन् ॥१३॥

अथ लोकसृष्टिरेतेषां अवस्थापनार्थं नाभ्याः सकाशात् अन्तरिक्षं उत्पन्नं आसीत् । शीर्ष्णः सकाशात् द्यौः समभवत् । श्रोत्रसकाशात् दिशः । पद्भ्यां सकाशात् भूमिः । तथा तेन प्रकारेण स एवं पुरुषः लोकान् कल्पयन् फलदो भवति ॥१३॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥

यदा पुरुषेण पशुना हविषा साध्या देवाः यज्ञं अतन्वत । तदा वसन्तर्तुः अस्य आज्यं आसीत् । ग्रीष्म इध्म आसीत् । शरद्धविरासीत् ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥

परिधयः सप्तास्य यज्ञस्यासन् । त्रिः त्रयः सप्तकाः समिधः कृताः । देवाः यत् यज्ञं तन्वानाः पुरुषं पशुं अबध्नत ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥

इदानीं 'यज्ञेन यज्ञं' यज्ञफलमुच्यते । देवाः साध्याः यज्ञेन हविर्भूतेन यज्ञमेवमयजन्त । एवं हि तेषां दर्शनम् । तानि धर्माणि प्रथमान्यासन् तानि दर्शनानि प्रशस्तानि मुख्यानि आसन् । ते ह नाकं महिमानः सचन्त । कमिति सुखनाम । तदेकेन नञा प्रतिषिद्धम् । स द्वितीयेन पुनः प्रतिषिध्यते । सर्वत्रैव स किंचित्सुखं किंचित् दुःखम् । अत्र तु सुखमेव पुण्यकृतो गच्छन्ति । यत्र पूर्वे साध्याः देवाः सन्ति । उक्तं च अन्यत्र 'सूर्याचन्द्रमसौ धाता' (ऋ.१०/१९०/३) । 'पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे (शु.य. ३४/४९) ॥ १६॥

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

उत्तरनारायणं उपस्तौतयः षट् कण्डिका । अत्र च पूर्वकल्पान्तरेण पुरुषमेधः याज्यादिरूपमापन्नः । परापरकोटिसंचारी स्तूयते । यः अद्भ्यः उदकात् संभृतः आहृतः पृथिव्याः सकाशात् संभृतः महाभूतपञ्चकात् यः संभृतः । रसाच्च विश्वकर्मणः ज्ञानकर्मसमुच्चयजनितफलविपाकात् उदायिनो रसात् विश्वं सर्वकर्म यस्य स विश्वकर्मा तस्माद्विश्वकर्मणः । अग्रे प्रथमं संभृतः सन् यः समवर्तत समभवत् । प्रथमलिङ्गशरीरः तस्य इदानीं त्वष्टा भगवानादित्यः रूपं विदधत् कुर्वन् । एति अहरहरकरोत् । तदेव अजस्रं मर्त्यस्य मनुष्यदेवत्वं देवत्वेन विभक्तिव्यत्ययः । आजानं अग्रे प्रथमं अजानं आजन्म उत्पत्तिः । शेषे दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता ॥ १७ ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥

जानाम्यहं तं आदित्यान्तरपुरुषं महान्तम् । अपूर्वं अपर्यन्तं आदित्यवर्णं आदित्यस्येव वर्णो यस्य स आदित्य-वर्णः । तं आदित्यवर्णं इत्यनेन उपमानोपमेयभावः । यथा आदित्यस्य प्रकाशः सन् अन्यान्यपि वस्तूनि प्रकाशयति । एवम-सावपि । तमसः परस्तात् अविद्या तम उच्यते । भेददर्शनं तमेव विदित्वातिमृत्युं अतीतमृत्युं परं ब्रह्म गच्छति । अपनाय मोक्षाय गमनाय नान्यः पन्था विद्यते व्यवधार्यते ॥ १८ ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

यः सर्वात्मा प्रजापतिः गर्भरूपेण अन्तरुदरे व्यवस्थितः चरति संचरति । यश्च अजायमानः कारणकार्यरूपेण बहुधा बहुप्रकारं जायते परिपश्यन्ति । तस्मिन्नेव कारणात्मनि भुवनानि भूतजातानि विश्वानि सर्वाणि तस्थुः स्थितानि ॥ १९ ॥

यो देवेभ्य आतपति यो देवानाँ पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥

यः आदित्यः देवेभ्योऽर्थाय आतपति यश्च सर्वकार्येषु देवानां पुरोहितः अग्रतो निहितः । यो देवेभ्यः सकाशात् पूर्वो जातः तस्मै नमः । रुचाय रुचकाराय रोचनाय दीप्ताय ब्राह्मये । ब्रह्मणोऽपत्यं ब्राह्मि । तस्मै ब्राह्मये अथवा ब्रह्मावयवाय ॥ २० ॥

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥

देवाः रुचं रोचमानं ब्राह्मं ब्रह्मावयवभूतं जनयन्तो देवाः । अग्रे प्रथमं तदिति ब्रुवन् किमिति त्वामेवेति । उक्तानुकीर्तनं त्वं ब्राह्मणो विद्यात् । तस्य ब्राह्मणस्य देवाः आसनं भवति । अ[सन्]वशे अवयवभूता हि तस्य देवाः । सर्वेश्वरो हि देवानाम् ॥ २१ ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२ ॥

यस्य श्रीश्च लक्ष्मीश्च पत्न्यौ । तया आश्रयणीयो भवति । साश्रीः सा लक्ष्मीः पत्नीरूपे । अहोरात्रे पार्श्वे नक्षत्राणि रूपम् । अश्विनौ व्यात्तं मुखं अथवा यस्य द्यावापृथिव्यौ प्राणिजातं मुखं 'द्यावापृथिव्यादिमे हीदꣳ सर्वमश्नुदाताम्' इति **श्रुतिः** । अतः त्वां याचे । 'इषु इच्छायां' (पा.धा.१४३९) रूपद्वयम् । कर्तरि विकरणव्यत्ययः । अहं कर्मफलं इच्छन् अवयवं निषाण यममुं लोकं आत्मत्वेन इषाण इच्छत । सर्वलोकं मे इषाण । आत्मत्वेन इच्छन् अहमेवं सर्वमित्यभिप्रायः ॥ २२ ॥

इति ऋजुव्याख्यायां संहितायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ अष्टत्रिंशोऽध्यायः ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याँ पूष्णो हस्ताभ्याम् ।
आददेऽदित्यै रास्नासि ॥१॥

[अथ ध]र्मदोहार्थं रज्जुमादत्ते । देवस्य त्वेति व्याख्यातम् । यतस्त्वं अदित्यै रास्नासि । अतः त्वां आददे गृह्णामि ॥१॥

इड एह्यदित एहि सरस्वत्येहि ।
असावेह्यसावेह्यसावेहि ॥ २ ॥

गामाह्वयति । इडे एहि, अदिते एहि, सरस्वति एहि । एतस्मिंस्तच्छब्दः अतिदेशार्थः । यथा हे इडे मानवि, आ इहि आगच्छ दोहाय । हे अदिते देवमातः एहि । सरस्वति वाक् एहि । नाम्ना च त्रिरुच्चैरसौ धवले एहि । त्रिरामन्त्रितस्येत्यादिरुदात्तः ॥ २ ॥

अदि॑त्यै॒ रास्ना॑सीन्द्रा॒ण्या उ॒ष्णीषः॑ पू॒षासि॑ घर्मा॑य दीष्व ॥३॥

अदित्यैरास्नासि । गां पाशेन प्रतिमुञ्चति । अदित्यै रास्नासीन्द्राण्या उष्णीषः । इन्द्राणी ह वा इन्द्रस्य प्रिया पत्नी तस्या उष्णीषः शिरोवेष्टनं त्वमसि । वत्समुत्सृजति । पूषासि । यथा पूषा वायुर्वृष्टिं आप्यापयति । एवं त्वमपि प्रस्नवेन जगदुत्पत्तिबीजं पयः आप्याययसि । वत्सं उन्नयति । घर्माय [घर्मार्थं] दीष्व दयति मानकर्मा पयस उपशेषं कुरु, मा सर्वं पासीः ॥३॥

अ॒श्विभ्यां॑ पिन्वस्व॒ सर॑स्वत्यै पिन्व॒स्वेन्द्रा॑य पिन्वस्व ।
स्वाहेन्द्र॑व॒त्स्वाहेन्द्र॑व॒त्स्वाहेन्द्र॒वत् ॥ ४ ॥

पिन्वने दोग्धि । अश्विभ्यां अर्थाय पिन्वस्व संप्लवस्व । एवमेव सरस्वत्यै इन्द्राय च । विप्रुषोऽभिमन्त्रयते । स्वाहा इन्द्रवत् ३ इन्द्रसंयुक्तं पयः स्वाहा सुहुतमस्तु ॥ ४ ॥

यस्ते॒ स्तनः॑ शश॒यो यो म॑यो॒भूर्यो र॑त्न॒धा व॑सु॒विद्यः सु॒दत्रः॑ ।
येन॒ विश्वा॒ पुष्य॑सि॒ वार्या॑णि॒ सर॑स्वति॒ तमि॒ह धा॑तवेऽकः ।
उ॒र्व॒न्तरि॑क्ष॒मन्वे॑मि ॥५॥

स्तनमालभते । यस्ते स्तनः वाग्देवत्या । हे सरस्वति, तं स्तनं इह धातवे दानपानाय अकः कुरु । येन स्तनेन विश्वानि वार्याणि वरणीयानि वीर्याणि पुष्णासि पुष्यासि । यस्ते तव स्तनः कथंभूतः शशयः सुशयः 'शीङ् स्वप्ने' (पा.धा.११०६) सुष्टुवास्ते यश्च मयोभूः मयः सुखं भावयति । सर्वभूतानां यश्च रत्नधाः रमणीयानां धनानां धारयिता । यश्च वसुवित् वसु च विन्दति । यश्च सुदत्रः कल्याणदानः कश्चिद्धनवानपि सन् दातुं नोत्सहते । उर्वन्तरिक्षेति व्याख्यातम् ॥५॥

गा॒य॒त्रं छन्दो॑ऽसि॒ त्रैष्टु॑भं॒ छन्दो॑ऽसि॒ द्यावा॑पृथि॒वीभ्यां॑ त्वा॒ परि॑गृह्णाम्य॒न्तरि॑क्षे॒णोप॑यच्छामि ।
इन्द्रा॑श्विना॒ मधु॑नः सार॒घस्य॑ घ॒र्मं पा॑त॒ वस॑वो॒ यज॑त॒ वाट् ।
स्वाहा॒ सूर्य॑स्य र॒श्मये॑ वृष्टि॒वन॑ये ॥ ६ ॥

शफावादत्ते । गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि । यजुर्महावीरं गृह्णाति । द्यावापृथिवीभ्यां त्वां परिगृह्णामि । महावीरे आदित्यं पयमत्या (उपयमन्या) उपगृह्णाति । अन्तरिक्षेणोपयच्छामि । अन्तरिक्षेण उपगृह्णामि । पर्यासिञ्चति । हे इन्द्राश्विनौ मधुनः मध्विव मधु सारघस्यवा सरघाः मधुकृतः भ्रमराः ऋत्विग्भिः कृतं सारघं मधु यत्तस्या(स्य) घर्मं पातं पिबतम् । हे वसवः वासयितारः वाट् वषट्कारेण यजत । स्वाहा सुहुतमस्तु । सूर्यस्य रश्मये वृष्टिवनये वृष्टेः संभकत्रे 'सूर्यस्य वा एको रश्मिर्वृष्टिवनिर्नाम' इति **श्रुतिः** ॥६॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा ।
अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥

इत उत्तरं द्वादशवातनामानि जय(यज)त्यध्वर्युः । समुद्राय त्वा एतस्माद्वाताख्यात् समुद्रात् सर्वाणि भूतानि समुद्रवन्तीति । समुद्रो वातः हे प्रवर्ग्य समुद्राय त्वां स्वाहा जुहोमि । एवमुत्तरत्र नियोजना । सरिराय । एतस्मात्सरिरात् सर्वाणि लब्धकार्याणि सेति इह ईरते गच्छति । अनाधृष्याय प्रति धर्षितुं अशक्याय । अवस्यवेऽवनि(न)शीलाय अशिमिदाय शिमीति कर्मनाम क्लेशात्मकं चैतत् । अक्लेशदाय ॥ ७ ॥

इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा ।
सवित्रे त्वं ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥८॥

इन्द्राय त्वा वसुमते रुद्रवते स्वाहा । इन्द्रायत्वाभिमातिघ्ने स्वाहा । सपत्नो वा अभिमातिः सवित्रे त्वा ऋभुमते विभुमते वाजवते स्वाहा । एते सुधन्विनः अंगिरसस्य त्रयः पुत्राः बभूवुः । तेषामयं संस्तवः ।बृहस्पतये त्वा विश्वदेव्यावते सर्वदेव्यावते सर्वदेव्यावते स्वाहा ॥८॥

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ९ ॥

यमाय त्वा अङ्गिरस्वते पितृमते स्वाहा । उपयमन्यासिञ्चति । घर्माय स्वाहा । सुहुतं घर्माय स्यात् एतज्जपति । सुहुतो घर्मः पित्रे स्यात् ॥९॥

विश्वा आशा दक्षिणसद्विश्वान्देवानयाडिह ।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥१०॥

वषट्कृते जुहोति । विश्वाः आशाः । अनुष्टुबाश्विनी । विश्वाः सर्वाः आशाः कामाः दक्षिणासत् दक्षिणा सीदन्तीति दक्षिणासत् इह दक्षिणतो हि स्थितः आहुतीर्जुहोति । वचनव्यत्ययः । दक्षिणासत् विश्वान् सर्वान् देवान् अयाट् यजेरेत-द्रूपम् । अयाक्षीत यष्टवीन् (इष्टवान्) । यत एवमतो ब्रवीमि । हे अश्विनौ स्वाहाकृतस्य घर्मस्य मधोःमध्वास्वादस्य पिबतम् ॥ १०॥

दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः ।
स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥ ११ ॥

दिवि धाः । त्रिरुपक्षयति । इमं यज्ञं दिविधा द्युलोके स्थापय । अभ्यासो भूयांसमर्थं मन्यते । अत्र वषट्कृते जुहोति । स्वाहाग्नये यज्ञियाय यज्ञहिताय सुहुतमस्तु । शं सुखं यजुर्भ्यो देहि ॥११॥

अश्विना घर्मं पातं ५ हार्द्दानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥

ब्रह्मानुमन्त्रयते । अश्विना घर्मम् । अश्विनौ हे अश्विनौ घर्मं पातं पिबतम् । हार्दं हृदयस्य प्रियं कैरहर्दिवाभिः अहःशब्दःपूर्वाह्णवचनः । दिवाशब्दः सायं स हि प्रवर्ग्यकालः । एतत् कालोपलक्षिताभिरूतिभिरवनैर्निमित्तभूतैः पिबतम् । तन्त्रेऽपि ये प्रसारिताः संस्रवः तेषु शीलमस्य स तन्त्रायी त्रिलोकी आदित्यः तस्मै नमः । उत्तरत्रानुषङ्गः नमो द्यावापृथिवीभ्याम् ॥१२॥

अपातामश्विना घर्ममनु द्यावापृथिवी अम ५ साताम् ।
इहैव रातयः सन्तु ॥१३॥

यजमानोऽनुमन्त्रयते । आपतं (अपातां) आश्विनौ ककुप् । अश्विना अश्विनौ घर्मं अपातं (अपातां) पीतवन्तौ तथा घर्मं तापं द्यावापृथिवी द्यावापृथिव्यावपि अन्वमंस्तां (अमंसातां) अनुमन्यमानौ अनुमतवत्यौ यत एवमतो ब्रवीमि इहावस्थितानामस्माकं रातयो धनानि सन्तु ॥ १३ ॥

इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्माऽमेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥१४॥

पिन्वमानमनुमन्त्रयते । इषे पिन्वस्व । वृष्टिं तर्पणाय विप्रुषो मुञ्च । ऊर्जे अन्नाय । ब्रह्मणे ब्राह्मणेभ्यः । क्षत्राय क्षत्रियेभ्यः द्यावापृथिवीभ्यां तर्पणाय पिन्वस्व । उत्तरं पूर्वया । उत्क्रामयति । अधर्मासि (धर्मासि) समस्तस्य जगतो धर्म धारणं त्वमसि । हे सुधर्म आहुतिपरिणामेन साधु धरणशील । स्वरे सादयति । अमेनि अहिंसन् अक्रुध्यन् अस्मे अस्मासु नृम्णं धनं धारय स्थापय । ब्रह्म धारय क्षत्रं धारय विशं धारय । त्रैवर्णिकानां सारमस्मासु स्थापय ॥ १४ ॥

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ।
स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्या ५ स्वाहा विश्वेभ्यो देवेभ्यः ॥१५॥

शाकलैर्जुहोति । स्वाहा पूष्णे । 'अयं वै पूषा यो ऽयं पवते वायुः । एष हीद ५ सर्वं पुष्यति । एष उ प्राणः प्राणमेवास्मिन्नेतद्दधाति' (बृह.माध्य. १४/२/१/९) पूष्णे । शरसे शिरःकत्रे । शरः शब्दः काण्डवचनः । दध्नः अस्ति वचनो वा । दध्न उपरि स्नेहप्रकृतिभूतः तर इति यज[मा]नाः प्राहुः तदभिप्रायम् । स्वाहा ग्रावभ्यः प्राणेभ्यो विषयग्रहणशीलेभ्यः स्वाहा । प्रतिरवेभ्यः प्राणा वै प्रतिरवाः तान् प्राप्य सर्वं जगत् रमते । स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यः ऊर्ध्वं प्रागग्रं बर्हिर्येषां ते ऊर्ध्वबर्हिषु । तेभ्य ऊर्ध्वबर्हिभ्यः सोमपा ह्येते इत्यर्थः । घर्मपावभ्यः घर्मदातृभ्यः स्वाहा । द्यावापृथिवीभ्यां स्वाहा । प्राणोदानौ वै द्यावापृथिवी विश्वेभ्यो देवेभ्यः प्राणा वै विश्वेदेवाः ॥१५॥

स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ।
अहः केतुना जुषताᳬ सुज्योतिर्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताᳬ सुज्योतिर्ज्योतिषा स्वाहा ।
मधु हुतमिन्द्रतमे अग्नावश्याम ते देव घर्म नमस्ते अस्तु मा मा हिᳬसीः ॥१६॥

स्वाहा रुद्राया । रुद्र इति स्तोतृमानसु पठितम् । रुद्रैः स्तोतृभिर्य आहूयते स रुद्रहूतिः । तस्मै रुद्राय रुद्रहूतये स्वाहा । एताः सप्ताहूतयः प्राणेषु । महावीरादुपयमन्यां प्रत्यानयति । स्वाहा संज्योतिषा ज्योतिः स्वाहा संगच्छतां ज्योतिषा ज्योतिः । 'ज्योतिर्वा इतरस्मिन् पयो (वायौ) भवति' । अहः केतुना व्याख्यातम् । यजमानाय घर्मोच्छिष्टं प्रयच्छति । हे देव घर्म सर्वथा नमस्तेऽस्तु मा मा हिंसीः । ते तव अंशं अस्माभिः अग्नौ । मधुहुतं मधूत्कटरसं हुतं इन्द्रतमे इन्द्रियवत्तमे वीर्यवत्तमे । होमादवशिष्टं तं वयं अश्यामः व्याप्नुमः भक्षयामः ॥१६॥

अभीमं महिमा दिवं विप्रो बभूव सप्रथाः ।
उत श्रवसा पृथिवीᳬ सᳬ सीदस्व महाँ २॥ असि रोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥१७॥

महावीरमासाद्यं (मासन्द्यां) करोति । अभीमं गायत्रीबृहत्यौ । गायत्र्या अवसानं नास्ति । अतिशक्वरीचाग्नेयी । यस्य तव महिमा इमं दिवं अभिबभूव अभिभवति । किंभूतो महिमा । विप्रो मेधावी सप्रथाः सर्वथा पृथुः । महिम्नो विशेषणम् । तं त्वां ब्रवीमि । उतापि च श्रवसा धनेन श्रवणीयेन वा यशसा पृथिवीमभिबभूवेत्यनुषङ्गः । संसीद[स्वेति] व्याख्यातम् । रोचस्व दीप्यस्वेति नार्थान्तरम् ॥१७॥

या ते घर्म दिव्या शुग्या गायत्र्याᳬ हविर्धाने ।
सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुब्भ्याग्नीध्रे ।
सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्म पृथिव्याᳬ शुग्या जगत्याᳬ सदस्या ।
सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥१८॥

इत उत्तरे उत्सादनमन्त्राः । या ते-शालाकेषु जुहोति । हे घर्म, या ते तव दिव्या शुक् या च गायत्र्यां हविर्धाने वर्तते सा ते तव आप्याय[तां] वर्धताम् । तां निष्ट्यायताम् । तस्यै ते तुभ्यं शुचे स्वाहा । 'ष्ट्यै स्त्यै शब्दसंघातयोः' (पा.धा.९७७; ९७६) निष्ट्या संहता भवतु । या ते अन्तरिक्षे त्रिष्टुप् आग्नीध्रे । समानमन्यत् । या ते पृथिव्यां जगत्यां सदसि भवा सदस्या ॥ १८ ॥

क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।

विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ॥ १९ ॥

निष्क्रामति क्षत्रस्य त्वा महावीरोऽभिधीयते बृहस्पत्या (बृहत्या) । क्षत्रस्य संबन्धिनः परस्पाय पालनाय । हे महावीर, त्वां अनुक्रमाम । ब्रह्मणस्तन्वं पाहि शरीरं पाहि गोपाय । किं च विश यज्ञो वै विशः । यज्ञस्य धर्मणा धारणेन निमित्तभूतेन त्वा त्वां महावीरं वयं अनुक्रामाम अनुक्रमाम । अनुगच्छेम सुविताय सुगताय सुप्रसूताय वा । नव्यसे नवतराय कर्मणे अनुक्रमाम ॥१९॥

चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः सनो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः ।

अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिम ॥२० ॥

महावीरं निदधाति । चतुःस्रक्तिः महाबृहती चतुःस्रक्तिरिति महावीरस्य स्रक्तयः कोणाः यश्चतुस्रक्तिः ऋतस्य यज्ञस्य यो नाभिर्नहनम् । सप्रथाः पृथुः नः सोऽ स्माकं विश्वायुः सर्वस्य आयुषो दाता स नः सर्वायुः सप्रथाः अभ्यासे भूयांसमर्थं मन्यते । त्वत्प्रसादात् अपद्वेषः अपगच्छतु । द्वेषः [अ]स्मत्तः वीतरागाः स्यामेत्यभिप्रायः । अपह्वरः 'ह्वल ह्मल चलने (पा.धा. ८५८,८५९) चलनं अस्मत्तः अपगच्छतु । जनित्वा म्रियते मृत्वा जायते इति चलनमभिप्रेतम् । तदपगच्छतु । अन्यव्रतस्य सश्चिम जगदनुग्राहकं कर्म वयं सश्चिम सेवामहे । येन सायुज्यं प्राप्नुवन्ति सन्तः ॥२०॥

घर्मैतत्ते पुरीषं तेन वर्धस्व चा च प्यायस्व ।

वर्धिषीमहि च वयमा च प्यासिषीमहि ॥२१॥

पयसा पूरयति । घर्मैतत् । हे घर्म एतत्पयः ते तव पुरीषं पूरयितृत्वेन वर्धस्वेत्यादि व्याख्यातम् ॥ २१ ॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।

सꣳ सूर्येण विद्युतदुदधिर्निधिः ॥ २२ ॥

परिसिञ्चति अचिक्रदत् । परोष्णिक् घर्मात्मनादित्यः स्तूयते । यो महावीरः प्रवृज्यमानः अचिक्रदत् क्रन्दतिः शब्दार्थः । पुनः पुनः शब्दमकरोत् । वृषा वर्षिता आहुतिपरिणामद्वारेण । हरिः हरितवर्णः महान् प्रभावः । मित्रो न दर्शतः मित्र इव दर्शनीयः सूर्येण संगत्य दिद्युतत् सह द्योतते । उदधि उदकधारणः सर्वसुखानां निधिः ॥ २२ ॥

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।

देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ २४ ॥

एधोऽस्येधिषीमहि ।

समिदसि तेजोऽसि तेजो मयि धेहि ॥ २५ ॥

न सुमित्रिया, उद्वयम् । एधोऽसि, व्याख्यातम् ॥ २३-२५ ॥

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।

तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ २६ ॥

दधिघर्मग्रहणम् । यावती । ऐन्दी । हे इन्द्र ते तव ग्रहं ऊर्जा अन्नेन सह मयि अक्षितं यथा भवति । तथा गृह्णामि । किं परिमाणं यावती यावत्परिमाणे द्यावापृथिव्यौ यावच्च क्षेत्रं परिमिताः सप्तसिन्धवः वितस्थिरे व्याप्नुवन्ति । यावन्तं ग्रहं गृह्णामि ॥ २६ ॥

मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।

घर्मस्त्रिशुग्विराजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥ २७ ॥

भक्षयति मयि त्यत् । पङ्क्तिर्यजमानाशीः । मयि त्यत् तत् इन्द्रियं वीर्यं बृहत् महत् अस्तु । मयि दक्षः संकल्पसंपत्तिरस्तु । मयि च क्रतुः संकल्पविशिष्टोऽस्तु । मयि च विराजा आदित्याख्येन ज्योतिषा सह ब्रह्मणा अग्न्याख्येन तेजसा सह घर्मः । विराजत्विति लकारव्यत्ययः । किंभूतः त्रिशुक् तिस्रः शुचः अस्येति स त्रिशुक् ताश्च शालाकमन्त्रे व्याख्याताः ॥ २७ ॥

पयसो रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् ।

त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्यते सुषुम्णाग्निहुतः ।

इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥ २८ ॥

पयसो यत् रेतः जगदुत्पत्तिबीजं आभृतं आहृतं तस्य तव दोहं पूरणं अशीमहि व्याप्नुमः । उत्तरामुत्तरां समाम् । समाशब्दो वर्षवचनः प्रतिसंवत्सरं सदाकालं चाशीमहि याजजूकाः स्याम इत्यर्थः । हे इन्द्र सुषुम्ण सुखस्वभाव ते तव दोहं वृष्टिलक्षणं क्रत्वे क्रतो उपहूतः सन् अहमपि भक्षयामि । त्विषः दीप्ते संपूर्वो वृजिः स्वीकरणे वर्तते । संवृक् क्रत्वे । क्रतोरिति विभक्तिव्यत्ययः । साधुक्रतुभूतस्य दक्षस्य संकल्पसिद्धिभूतस्य सुषुम्णस्य सुखभूतस्य अग्निहुतः अग्नौ हूयत इत्यग्निहू तस्य अग्निहुतः । इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमतः रसवतः उपहूतस्य आहूतस्य शेषभूतमहं भक्षयामि ॥२८॥

इति ऋजुभाष्ये संहितायामष्टत्रिंशोऽध्यायः ॥३८॥

॥ एकोनचत्वारिंशोऽध्यायः ॥

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः ।
पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा ।
दिवे स्वाहा सूर्याय स्वाहा ॥ १ ॥

इत उत्तरं प्रवर्ग्यभेदं प्रायश्चित्तं स्वाहा प्राणेभ्यः साधिपतिकेभ्यः पूर्णाहुतिं यावत् जुहोति । स्वाहा प्राणेभ्यः साधिपतिकेभ्यः मनो वै प्राणानामधिपतिः स्वाहा सुहुतमस्तु । पृथिव्यै स्वाहेत्यादि स्पष्टम् ॥ १ ॥

दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहा वरुणाय स्वाहा ।
नाभ्यै स्वाहा पूताय स्वाहा ॥ २ ॥

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा ।
चक्षुषे स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥३॥

मनेसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥४॥

मनसः कामं पूर्णाहुतिहोमः । यजमानाशीः । अनया पूर्णाहुत्या मनसः कामं कामप्राप्तिं आकूतिं आकुरुतम् । मया वाचः सत्यं यष्टव्यं च अशीय प्राप्नुयाम् । किं च पशूनां रूपं पशूपकारः अन्नस्य रसः यश[श्च]श्रीश्च श्रयतां श्रयतु मयि मामिति विभक्तिव्यत्ययः । यन्महावीरभेदनेनापचितं तत्सर्वमुपचीयतामित्यर्थः ॥४॥

प्रजापतिः संम्रियमाणः सम्राट् संभृतो वैश्वदेवः सꣳ सन्नो धर्मः प्रवृक्तस्तेज उद्यत
आश्विनः पर्यस्यानीयमाने पौष्णो विष्यन्दमाने मारुतः क्लृप्यन् ।
मैत्रः शरसि संताप्यमाने वायव्यो ध्रियमाण आग्नेयो हुयमानो वाग्घुतः ॥ ५ ॥

प्रजापतिः संम्रियमाणः । महावीरस्थानप्रतिपादिका **श्रुतिः** ॥५॥

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे चन्द्रमाः पञ्चम ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे
मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वेदेवा द्वादशे ॥ ६ ॥

सविता प्रथमेऽहन्नित्याह । देवतासंबन्धविधानात् स्तौति । महावीरप्रायश्चित्तानि समाप्तानि ॥ ६ ॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ।
सासहाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥७॥

उग्रश्च अग्निकण्डिका आरण्या ..... (after this, folios are missing)

अग्नि ५ हृदयेनाशनिं ५ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना ।
शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं देवं वनिष्ठुना
वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥८॥

उग्रं लोहितेन मित्र ५ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा ।
भवस्य कण्ठ्यं ५ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥ ९ ॥

लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय
स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा ।
मा५सेभ्यः स्वाहा मा५सेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः
स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा ।
रेतसे स्वाहा पायवे स्वाहा ॥१०॥

आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ।
शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥११॥

तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा ।
निष्कृत्यै स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥१२॥

यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा ।
विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्या ५ स्वाहा ॥१३॥

[इति ऋजुभाष्ये संहितायामष्टत्रिंशोऽध्यायः ॥३८॥]

॥ चत्वारिंशोऽध्यायः ॥

ईशा वास्यमिद ५ सर्वं यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥

॥ ॐ नमो श्रीवेदपुरुषाय नमः ॥

ज्ञानकाण्डमिदानीं प्रस्तूयते । ईशावास्यं तिस्रोऽ[नुष्टुभः । दध्यङ्ङा ।] थर्वणऋषिः स्वशिष्यं पुत्रं वा गर्भाधानादिभिः

संस्कारैः संस्कृतशरीरं अधीतवेदं उत्पा[दितपुत्रं यथा] शक्त्यनुष्ठितयज्ञं अपापं निस्पृहं यमनियमवन्तं अतिथिपूजापनीतकिल्बिषं मुमुक्षुमुपसंपन्नं शिक्षयन्नाह। ईशावास्यमिति 'ईश ऐश्वर्ये' (पा.धा. १०९०) किपि तृतीयान्तस्यैतद्रूपं यदीशा अनेन वास्यं [वसनीयं ममेदमि]त्यनया भावनया आच्छादनीयमिदं सर्वमिति प्रत्यक्षतो निर्दिशति। जगत्यां पृथिव्यां [जग]-त्स्थावरजङ्गमादि स्वस्वामिसम्बन्ध्य[भि] लिङ्गितं स्यात्। तेन तेन त्यक्तेन सर्वेण त्यक्तस्वस्वा[मिसंबन्धे]न भोगान् भुंजीथाः अनुभवेः। कस्यस्विद्धनं ममेदमिति मा गृधः। 'गृधु अभिकांक्षायाम्' (पा.धा. १३२६)। माभिकाङ्क्षय। मा कृथाः। स्विदिति निपातो वितर्कवचनः। कस्य पुनरेतद्धनं कस्यचिदपि न। तद्यथा स्त्री संपत्तिः। अन्यथा भुङ्क्ते, अन्यथा पुत्रः अन्यथा प्राघूर्णकः। तथा कटककेयूरादीन्यलंकरणानि अन्यं वान्यं च पुरुषं उपतिष्ठमानानि दृश्यन्ते। अतः सर्वार्थस्य यः स्वस्वामिसम्बन्धः सा अविद्या। निस्पृहस्य योगेऽधिकार इति ॥१॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ५ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

निस्पृहस्य योगिनो ज्ञाननिमित्ते कर्मण्यधिकार इति तदर्थमाह इहलोके मुक्तिहेतूनि कर्माणि कुर्वन् पथ्यहितं मितभक्षणेन शतं समाः जिजीविषेत् जिजीविषेरिति पुरुषव्यत्ययः जीवितुमिच्छेः। एवं त्वयि तवे[ति] विभक्तिव्यत्ययः। मुक्तिरस्तीति शेषः। नान्यथेतोऽस्ति अन्यथा मुक्तिर्नास्ति। [ननु] कर्मणः फलेन भवितव्यं कथं मुक्तिप्राप्तिरित्येतदाह। न कर्म लिप्यते नरे। न हि मुक्त्यर्थं कर्मक्रियमाणं नरे मनुष्ये संबध्यते। किन्तु मुक्तिप्रदानेनोपक्षीणत्वात्। तथा च **बृहदारण्यके** 'तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन च, (माध्यदिन.शत. १४/७/२/२५) इति विविदिषन्ति वेदितुमिच्छन्ति। अनेनैतद्दर्शयति यावदिच्छाप्रवृत्तिः तावत् कर्मस्वधिकार इति ॥२॥

असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्यापिगच्छन्ति ये के चात्महनो जनाः ॥३॥

इदानीं स्वर्गादिप्राप्तिहेतुभूतानि कर्माणि कुर्वन्ति तानि निगद्यन्ते। असुराणां स्वभूताः असुर्याः एवं संज्ञास्ते लोकाः। सर्वतः अन्धेन तमसा ध्वान्तलक्षणेन तमसावृताः ते जनाः प्रेत्य मृत्वा तान् लोकान् गच्छन्ति। अपि च ये के चात्महनो जनाः। आत्मानं घ्नन्ति ये जनाः ये स्वर्गप्राप्तिहेतुभूतानि कर्माणि कुर्वन्ति। ते हि जनित्वा म्रियन्ते मृत्वा जायन्ते। एवमहर्निशं नाशं प्राप्नुवन्ति ॥३॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

इदानीं यमनियमवतां मुमुक्षूणां यथाभूतं परं ब्रह्म तत्त्वेनोपास्यं तदाह। उक्तम्- 'अहं ब्रह्मास्मि' (बृह.१/४/१०) सम्बन्धः। इदं सर्वं च मन्मयम्। इयं विद्यासमुद्दिष्टा विमुक्तिर्यन्निर्बन्धिनी। अनेजदेकम्। अनेजत् अचलत् तत्त्वमास्ते। एकमद्वितीयं विज्ञानघनरूपेण। मनसो जवीयः। मनस्तावत् शीघ्रं भवति ततोऽपि शीघ्रतरं प्रसवदानेन निराकार-भूतत्वात्। नैनद्देवा आप्नुवन् न चैतत्तत्त्वं देवा अपि आप्तुं शक्ताः सूक्ष्मत्वात्। पूर्वमर्शत्। रुशतिर्हिंसाकर्मा निरिशति अशतिः

पूर्वं अनादिनिधनः अविनाश्यदास्ते । तद्धावतः तदः स्थाने यदो वृत्तिः यच्च धावतः । अन्यान् पुरुषान् अभ्येति अतिक्रम्य गच्छंस्तिष्ठन्ति । सर्वशक्तित्वमनेन व्याख्यायते । तस्मिन् यस्मिन्नपः । कर्माणि मातरिश्वा वायुर्दधाति स्थापयति । सर्वाणि कर्माणि यज्ञदानहोमादीनि समिध्यमानानि यजूंषि वायौ स्थाप्यन्ते । पश्चाद्वायुरपि व्यष्टिसमष्टिरूपो यस्मिन् कर्माणि स्थापयति । यतो यागहोमदानानां परमं निधानं तत् ॥ ४ ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

एवं कारणरूपमात्मानमुद्दिश्याथेदानीं कार्यरूपेणोपदिशति । तदेजति-अनुरुक्तिः । तदेव सर्वप्राणिरूपेणावस्थितं सत् एजति कम्पवद्भवति । तदेव च न चलति स्थावररूपावस्थम् । तच्च दूरे आदित्यनक्षत्रादिरूपेण 'सर्वं खल्विदं ब्रह्म' (छान्द. ३/१४/१) इत्येतद्दर्शनार्थं तदन्तरस्य सर्वस्य प्राणिजातस्य विज्ञानघनरूपेणान्तर्मध्यत आस्ते । तदेव सर्वस्य अस्य प्राणिजातस्य बाह्यतः जडरूपेण व्यवस्थितं आस्ते । चेतनाचेतनरूपसर्वगमनं तद् ब्रह्मेति । अस्याः उपासनायाः अर्चिरादिकस्य कर्मणः अनुचिन्तनं नास्त्येवं केचिदाहुः । इहैव ब्रह्मप्राप्तेः ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानु पश्यति ।

सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥६॥

यः तु पुनः सर्वाणि भूतानि चेतनाचेतनानि आत्मन्येवानुपश्यति । मय्येव सर्वाणि भूतानि अवस्थितानि न मद्व्यतिरिक्तानि । अहमेव परं ब्रह्म । सर्वेषु भूते[षु] चात्मानं अवस्थितं व्यतिरिक्तं पश्यति । ततो न विचिकित्सति । एवं पश्यतो योगिनः परब्रह्मरूपाणि आत्मसंस्थितानि 'घनविज्ञानानन्दैकत्वादीनि यदा एवं तदा चिन्ता विचारो निवर्तते ॥ ६ ॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

किं च यस्मिनवस्थाविशेषे सर्वाणि भूतानि चेतनाचेतनानि आत्मैवाभूत् संभवन्ति । विजानतः आत्मैवेदं सर्वं खल्विदं ब्रह्मेत्येवमादिवाक्यविचारणावधृतविज्ञानस्य तव एतस्यामवस्थायां विशेषे योगिनः । को मोहः कश्च शोकः न कश्चिदपीत्यभिप्रायः । शोकमोहापरिज्ञाततत्त्वस्य भवतः । एकत्वमनुपश्यतः ध्यायतः ॥७॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविर ५ शुद्धमपापविद्धम् ।

कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

य एवमात्मानमुपास्ते स पर्यगात् परिगच्छति । किं भूतं शुक्रं शुक्लं विज्ञानानन्दस्वभावं अचिन्त्यशक्तिं अकायं न विद्यते कायः शरीरं यस्येति सः तम् । अव्रणं कायरहितत्वादेव । अस्नाविरं स्नायुरहितमकायत्वादेव

शुद्धसत्त्वरस्तमोभिरनुपहितम् । अपापविद्धं क्लेशकर्मविपाकाशयैरस्पृष्टम् । अकायमव्रणमस्नाविरमिति पुनरुक्तानि अभ्यासे भूयांसमर्थं मन्यते इत्यदोषः । अथान्योपासनायुक्तस्य फलमाह । रूपेण भविता माया याथातथ्यतः । अर्थान्व्यदधात् यथास्वरूपं अर्थान् विहितवान् स्वस्वामिसम्बन्धैरर्थैश्चेतनाचेतनैरुपभोगं कृतवान् । स सोपाधिस्वर्गलक्षणं गच्छति । यथा स्वर्गप्राप्तौ नानाभूताः प्रकाराः सन्ति । न तथा मुक्तौ । अथ फलादर्शी कविर्विद्वान् मनीषी मेधावी परिभूः सर्वतो भाविनो विज्ञानबलात् ब्रह्मरूपेण भविता । त्यक्ते स्वस्वामिसंबन्धेन याथातथ्यतः अर्थान् व्यदधात् यथास्वरूपं अर्थान् विहितवान् । शाश्वतीभ्यः । अनन्ताभ्यः समाभ्यः अर्थाय अन्तवते वर्षाप्राप्तये [अनन्तवर्षप्राप्तये] कर्म कृतवान् । ननु कर्मजाड्यो लोकः सान्तवानेव भवति । सत्यं आत्मा(त्म)संस्कारकं कर्म ब्रह्मभावजनकं स्यात् । तस्मात्सोऽपि शुक्रं अकायं ब्रह्म परिगच्छति । कर्मकाण्डज्ञानकाण्डसम्बन्ध्यः सन्तः । इत उत्तरं उपासनामन्त्राः ॥ ८ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्या ५ रताः ॥ ९ ॥

ये उकाराः कर्मकारकाः कर्मोपसंग्रहार्थीयाः ..... (lacuna) संभूत्यामेव रताः । संभूतिं उपासते । ते अन्धं तमः प्रविशन्ति । ये च लोकायतिकाः प्रश्नयन्ति तेषामेतद्दर्शनं जलबुद्बुदवज्जीवापादकशक्तिवद्विज्ञानमिति । मृतस्य सतः पुनः संभवो नास्ति । अतः शरीरग्रहणादस्माकं मुक्तिरेव न हि विज्ञानात्मा कश्चिदस्ति योऽयं नियमैः सम्बध्यते । य ये एवं उपासते । ते ततोऽपि अन्धतमः अज्ञानलक्षणं भूयः बहुतरं तमः प्रविशन्ति । ते संभूत्यामेव रताः । ये चात्मोपासकाः आत्मैवास्ति नान्यत्किंचिदस्ति एवमभिप्रायाः कर्मपराङ्मुखाः कर्मकाण्डज्ञानकाण्डयोरसबन्धः स्वबुद्ध्यात्मानन्दरसं विभावयन्तः । ते आत्मज्ञानरता न प्रविशन्ति ॥ ९ ॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

संभवात् संभवपरिज्ञानात् अन्यदेव फलं आहु : । असंभवपरिज्ञानात् । अन्यच्च फलं आहुः । तदुभयं धीराणां वचांसि, शुश्रुमः श्रुतवन्तो वयम् । ये धीराः नः अस्माकं बहु विचचक्षिरे आख्यातवन्तः ॥ १० ॥

संभूतिं च विनाशं च यस्तद्वेदोभयं ५ सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते ॥ ११ ॥

यः योगी समस्तस्य जगतः संभवैकहेतु परं ब्रह्म । विनाशि च शरीरम् । सह एकीभूतं तदुभयं वेद जानाति । शरीरग्रहणेन ज्ञानोत्पत्तिहेतूनि कर्माणि करोति । स विनाशेन विनाशिना शरीरेण मृत्युं तीर्त्वा उत्तीर्य संभूत्यात्मपरिज्ञानेन अमृतत्वं प्राप्नोति ॥ ११ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां ५ रताः ॥ १२ ॥

अज्ञानलक्षणं तमः प्रविशन्ति । ये अस्वर्गार्थानि कर्माणि उपासते अनुतिष्ठन्ति । ततोऽपि ते बहुतरं तमः प्रविशन्ति । ये तु केवलं विद्यामेव रताः ॥ १२ ॥

अन्यदेवाहुर्विद्यायाऽ अन्यदाहुरविद्यायाः ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

अविद्यायाः कर्मणः विद्यैव फलमाहुः । यतः विद्यया आत्मज्ञानात् । अन्यच्च शुश्रुमेत्यादि व्याख्यातम् ॥ १३ ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं ५ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ १४ ॥

विद्यां चात्मज्ञानम् । अविद्यां च कर्मज्ञानं यस्तदुभयं एकीभूते वेद जानाति । कर्मकाण्डे ज्ञानकाण्डस्य गुणभूतं जानाति स अविद्यया कर्मकाण्डेन मृत्युं उत्तीर्य कृतकृत्यो भूत्वा विद्यया ब्रह्मपरिज्ञानेन अमृतत्वं प्राप्नोति ॥१५॥

वायुरनिलममृतमथेदं भस्मान्त ५ शरीरम् ।
ओ३म् क्रतो स्मर क्लिबे स्मर कृत ५ स्मर ॥ १५ ॥

इदानीं कृतब्रह्मोपासनस्य योगिनः शरीरपातोत्तरकालं यद्भवति तदाह वायुग्रहणं सप्तसप्तक(दशक)लिङ्गोपलक्षणार्थं वायुः प्राणः अनिलः स्वकीयां प्रकृतिमापद्यते । विज्ञानात्मा तत्परं ब्रह्म अमृतं संपद्यते । अथ इदं स्थूलशरीरं भस्मैव भवति । कृतप्रयोजनात् । इदानीं योगिनो चलं च (योगिनः आलम्बन)भूतमक्षरं कथ्यते । ॐ नाम वा प्रतिमा वा ब्रह्मणः । तदानीं अन्तकाले योगी स्मरणं करोति । क्रतो स्मर । योऽग्निर्ब्रह्मचर्ये गार्हस्थ्ये च परिचरितः स मनः शव(**श्वास**) समाधिरूपेणावस्थितः सम्बोध्यते । हे क्रतो, मां स्मर इदानीं उपस्थितः प्रत्युपकारस्य काल इति । क्रतुर्वा यज्ञः सम्बोध्यते । क्रतो स्मर यत्कृतं तत्स्मर ॥ १५ ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १६ ॥

हे अग्ने, सुपथा देवयानेन मार्गेण नय । राये मुक्तिलक्षणाय धनाय हे देव, अस्मान् विश्वानि प्रज्ञानानि प्रतिबन्धकान्मनसः पृथक्कुरु, यतो बहुतरं तव नमस्कारोक्तिं कुर्मः । व्याख्यायाः पुनर्वचनं विशेषार्थम् ॥१६॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
योऽसावादित्ये पुरुषः सोऽसावहम् ॥ १७ ॥
ओ३म् खं ब्रह्म ॥

इदानीं आदित्योपासनं आह । हिरण्मयेन । रसमयः अस्मिन्नवस्थितान् रसान् हिरण्मयेन रूपेण पात्रेण कृत्वा

पिबन्ति । इति पात्रं यद्यपि सत्यस्याविनाशिनः पुरुषस्य मुखं हिरण्मयेन पात्रेण अपिहितम् । अन्तर्हितं तथापि योऽसौ आदित्ये पुरुषो योगिभिरुपलभ्यते । सोऽसौ अहमसौ । तां उपासनां कुर्यात् ॥१७॥

ॐ इति नामनिर्देशः । आत्मत्वेनाकाशरूपं ब्रह्म ध्यायात् । ननु अचेतनः आकाशः चेतनस्त्वात्मा । तद्यथा 'विज्ञानघनमानन्दं ब्रह्म' (बृह. ३/९/२८) न चानन्दप्रतिपादकं वाक्यं ' स यो मनुष्याणा ५् राद्धः समृद्धो भवति' (बृह. ४/३/३३), उपक्रम्य अथ 'ये प्रजापतिलोकमानन्दाः स एव ब्रह्मलोके आनन्दः' (बृह. ४/३/३३) तथा सर्वनियन्तृत्वं दर्शयति । 'एतस्य वा अक्षरस्य प्रशासने गार्गि' इत्युपक्रम्य 'द्यावापृथिवी विधृते तिष्ठत' (बृह. ३/८/९) इत्यादि । तथा सर्वज्ञत्वं दर्शयति । 'तद्वा एतदक्षरं गार्गि अदृष्टम्' (बृह.३/८/११) इत्यादि । तथा सत्यसंकल्पादयो गुणाः अस्य श्रूयन्ते । 'सत्यसंकल्पः' (मैत्रा. ७/७) इत्यादि । 'एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्च (बृह. ३/८/११) इति । सामान्यादाकाशेनैव एतद्रूपं ब्रह्माभिहितं स्यात् । अयमेव श्च ब्रह्मविधौ सिद्धान्तः ॥

इति ऋजुव्याख्याने संहितायां चत्वारिंशत्तमोऽध्यायः ॥ संवत् १५६४ फागुण शु १४ भूमे लिखि १०५ ॥ मालजी ॥

Appendix – I
Alphabetical Index of *Mantras*

	मन्त्रः	अध्यायः	मन्त्र क्रमः
१.	अ॒क्ष॒रा॒जाय॑ कित॒वं कृ॒त्वा	३०	१८
२.	अ॒ग्नये॑ गाय॒त्राय॑ त्रि॒वृते॑	२९	६०
३.	अ॒ग्नयेऽनी॑कवते॒ रोहि॑तान्	२९	५९
४.	अ॒ग्नये॒ पीव॑नं पृथि॒व्यै पीठं॰	३०	२१
५.	अ॒ग्नि ५ हृ॒दये॑ना॒शनि॒ ५	३९	८
६.	अग्ने॒ नय॑ सु॒पथा॑ रा॒ये	४०	१६
७.	अचि॑क्रद॒द्वृषा॒ हरि॑र्म॒हान्	३८	२२
८.	अत्रा॑ ते रू॒पमु॑त्त॒ममप॑श्यं	२९	१८
९.	अथै॒तान॒ष्टौ विरू॑पा॒नाल॑॰	३०	२२
१०.	अदि॑त्यै॒ रास्ना॑सीन्द्रा॒ण्या	३८	३
११.	अ॒ब्द्भ्यः संभृ॑तः पृथि॒व्यै	३१	१७
१२.	अनु॑ त्वा॒ रथो॒ अनु॒ मर्यो॑	२९	१९
१३.	अने॑ज॒देकं॒ मन॑सो॒ जवी॑यः	४०	४
१४.	अ॒न्त॒रा मि॒त्रावरु॑णा॒	२९	६
१५.	अ॒न्धं तमः॒ प्रवि॑शन्ति॒	४०	९
१६.	अ॒न्धं तमः॒ प्रवि॑शन्ति॒	४०	१२
१७.	अ॒न्यदे॒वाहु॑र्विद्या॒या	४०	१३
१८.	अ॒न्यदे॒वाहुः स॑भ॒वात्	४०	१०
१९.	अपा॑तामा॒श्विना॑ घर्म	३८	१३
२०.	अ॒भी॒मं म॑हि॒मा दिवं॒	३८	१७
२१.	अर्मे॑भ्यो हस्ति॒पं ज॒वाया॑	३०	११
२२.	अश्वि॑ना घ॒र्मं पा॑त॒ ५	३८	१२
२३.	अ॒श्वि॒भ्यां॑ पिन्वस्व॒ सर॑स्वत्यै	३८	४
२४.	अश्वो॑ घृ॒तेन॒ त्मन्या॒ सम॑॰	२९	१०

२५.	असिं यमो अस्यादित्यो	२९	१४
२६.	असुर्या नाम ते लोका	४०	३
२७.	अहिरिव भोगैः पर्येति बाहुं	२९	५१
२८.	आक्रन्दय बलमोजो न आ	२९	५६
२९.	आग्नेयः कृष्णग्रीवः सार०	२९	५८
३०.	आजङ्घन्ति सान्वेषां जघनाँ	२९	५०
३१.	आजुह्वानः ईड्यो वन्द्यश्चा०	२९	२८
३२.	आत्मानं ते मनसारादजाना	२९	१७
३३.	आदित्यैर्नो भारती वष्टु	२९	८
३४.	आनो यज्ञं भारती तूयं	२९	३३
३५.	आमूरज प्रत्यावर्तयेमाः	२९	५७
३६.	आयासाय स्वाहा प्राया०	३९	११
३७.	आ सुष्वयन्ती यजते	२९	३१
३८.	इड एह्यदित एहि सर०	३८	२
३९.	इन्द्रस्य वज्रो मरुतामनीकं	२९	५४
४०.	इन्द्राय त्वा वसुमते रुद्रव०	३८	८
४१.	इमा ते वाजिन्नवमार्ज	२९	१६
४२.	इषे पिन्वस्वोर्जे पिन्वस्व	३८	१४
४३.	ईड्यश्चासि वन्द्यश्च	२९	३
४४.	ईर्मान्तासः सिलिकमध्य०	२९	२१
४५.	ईशावास्यमिदꣳ सर्वं	४०	१
४६.	उग्रं लोहितेन मित्र०	३९	९
४७.	उग्रश्च भीमश्च ध्वान्तश्च	३९	७
४८.	उत्सादेभ्यः कुब्जं प्रमुदे	३०	१०
४९.	उद्वयं तमसस्परि स्वः	३८	२४

५०.	उप प्रागात्परमं यत्सध०	२९	२४
५१.	उप प्रागाच्छसनं वाज्यर्वा	२९	२३
५२.	उपश्वासय पृथिवीमुत द्यां	२९	५५
५३.	उपावसृज त्मन्या समञ्ज	२९	३५
५४.	ऋजीते परिवृङ्ग्धि नोऽश्मा	२९	४९
५५.	ऋतयें स्तेनहृदयं वैरह०	३०	१३
५६.	एता उ वः सुभगा विश्व०	२९	५
५७.	एतावानस्य महिमातो	३१	३
५८.	एधोस्येधिषीमहि समि०	३८	२५
५९.	कुर्वन्नेवेह कर्माणि जि०	४०	२
६०.	केतुं कृण्वन्न केतवे पेशो	२९	३७
६१.	क्षत्रस्य त्वा परस्याय	३८	१९
६२.	गायत्रं छन्दोसि त्रैष्टुभं	३८	६
६३.	घर्मैतत्ते पुरीषं तेन	३८	२१
६४.	घृतेनाञ्जन्सं पथो देव०	२९	२
६५.	चतुःस्रक्तिर्नाभिर्कृत०	३८	२०
६६.	चन्द्रमा मनसो जातश्च०	३१	१२
६७.	जीमूतस्येव भवति प्रतीकं	२९	३८
६८.	ततो विराडजायत विराजो	३१	५
६९.	तत्सवितुर्वरेण्यं भर्गो	३०	२
७०.	तदेजति तनैजति त०	४०	५
७१.	तनूनपात्पथ ऋतस्य याना०	२९	२६
७२.	तपसे कौलालं मायायै कर्मार०	३०	७
७३.	तपसे स्वाहा तप्यंते	३९	१२

७४.	तव॒ शरी॑रं तपयि॒ष्णु॒र्वर्न्	२९	२२
७५.	तस्मा॒दश्वा॑ अजायन्त॒	३१	८
७६.	तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒ संभृ॑०	३१	६
७७.	तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒	३१	७
७८.	ती॒व्रान्घोषा॑न्कृण्वते॒ वृष॑०	२९	४४
७९.	ते आ॒चर॑न्ती॒ समे॑नेव॒	२९	४१
८०.	तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न्	३१	९
८१.	त्रीणि॑ त आहुर्दि॒वि बन्ध॑०	२९	१५
८२.	त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒ पादो॑	३१	४
८३.	त्वष्टा॑ वी॒रं दे॒वका॑मं जजान॒	२९	९
८४.	दि॒ग्भ्यः स्वाहा॑ च॒न्द्राय॒	३९	२
८५.	दि॒वः पृ॑थि॒व्या पर्यो॑ज॒ उद्भृ॑०	२९	५३
८६.	दि॒विधा॑ इ॒मं य॒ज्ञमि॒मं	३८	११
८७.	देवं॑ सवि॒तः प्रसु॑व य॒ज्ञं	३०	१
८८.	दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒	३८	१
८९.	दैव्या॒ होता॑रा प्रथ॒मा सु॒वाचा॒	२९	३२
९०.	धन्व॑ना॒ गा धन्व॑ना॒जिं जये॑०	२९	३९
९१.	धा॒नव॑न्तं कर॒म्भिणं॑	२९	२९
९२.	न॒दीभ्यः॑ पौञ्जि॒ष्ठमृ॒क्षीका॑भ्यो	३०	८
९३.	नरा॒शꣳ सस्य महि॒मान॑०	२९	२७
९४.	न॒र्माय॑ पुंश्च॒लूꣳ हसा॑य॒	३०	२०
९५.	नाभ्या॑ आसीद॒न्तरि॑क्षꣳ	३१	१३
९६.	नृ॒त्ताय॑ सू॒तं गी॒ताय॑ शैलू॒षं	३०	६
९७.	पय॑सो॒ रेत॒ आभृ॑तं	३८	२८
९८.	पुरु॑ष ए॒वेदꣳसर्वं॒ यद्भू॒तं	३१	२
९९.	प्र॒जाप॑तिः संभ्रि॒यमा॑णः	३९	५

१००.	प्रजापतिश्चरति गर्भे अन्तः	३१	१९
१०१	प्रजापतेस्तपसा वावृधानः	२९	११
१०२	प्रतिश्रुत्का वा अर्तनं घोषा	३०	१९
१०३.	प्रथमा वा ऽ सरथिना	२९	७
१०४.	प्राचीनं बर्हिः प्रदिशा पृ०	२९	२९
१०५.	बह्वीनां पिता बहुरस्य पुत्रः	२९	४२
१०६.	बीभत्सायै पौल्कसं वर्णाय	३०	१७
१०७.	ब्रह्मणे ब्राह्मणं क्षत्राय	३०	५
१०८.	ब्राह्मणोऽस्य मुखमासीत्	३१	११
१०९.	भायै दार्वाहारं प्रभाया	३०	१२
११०.	मनसः काममाकूतिं	३९	४
१११.	मन्यवेऽयस्तापं क्रोधाय	३०	१४
११२.	मयि त्यदिन्द्रियं बृहत्	३८	२७
११३.	य इमे द्यावापृथिवी	२९	३४
११४.	यज्ञेन यज्ञमयजन्त देवाः	३१	१६
११५.	यत्पुरुषं व्यदधुः कतिधा	३१	१०
११६.	यत्पुरुषेण हविषा देवा	३१	१४
११७.	यदक्रन्दः प्रथमं जायमानं	२९	१२
११८.	यमाय यमसूमर्थर्वभ्यो	३०	१५
११९.	यमाय स्वाहान्तकाय	३९	१३
१२०.	यमाय त्वाङ्गिरस्वते पि०	३८	९
१२१.	यमेन दत्तं त्रित एनमायु०	२९	१३
१२२.	यस्तु सर्वाणि भूतान्या०	४०	६
१२३.	यस्ते स्तनः शशयो यो म०	३८	५
१२४.	यस्मिन्त्सर्वाणि भूता०	४०	५
१२५.	या ते घर्म दिव्या शुग्या	३८	१८

१२६.	यावंती द्यावापृथिवी	३८	२६
१२७.	यो देवेभ्यं आतपति यो	३१	२०
१२८.	रथवाहंण ५ हविरंस्य नाम	२९	४५
१२९.	रथे तिष्ठन्नयति वाजिनः	२९	४३
१३०.	रुचं बाह्मं जनयंन्तो देवा	३१	२१
१३१.	लोमंभ्यः स्वाहा लोमंभ्यः	३९	१०
१३२.	वक्ष्यन्तीवेदागंनीगन्ति	२९	४०
१३३.	वनस्पतिरवंसृष्टो न पाशैः	२९	४५
१३४.	वाचे स्वाहा प्राणाय	३९	३
१३५.	वायुरनिलममृतम०	४०	१५
१३६.	विद्यां चाविद्यां च	४०	१४
१३७.	विभक्तारं ५ हवामहे वसो०	३०	४
१३८.	विश्वा आशा दक्षिणस०	३८	१०
१३९.	विश्वानि देव सवितुर्दु०	३०	३
१४०.	वेदाहमेतं पुरुषं महान्त०	३१	१८
१४१.	व्यचंस्वतीरुर्विया विश्र०	२९	३०
१४२.	श्रीश्च ते लक्ष्मीश्च पत्न्या०	३१	२२
१४३.	सद्यो जातो व्यमिमीत यज्ञ०	२९	३६
१४४.	सपर्यगाच्छुक्रमकाय०	४०	८
१४५.	सप्तास्यासन्परिधयः	३१	१५
१४६.	समिद्धो अञ्जन्कृदरं	२९	१
१४७.	समिद्धो अद्य मनुषो दुरो	२९	२५
१४८.	समुद्राय त्वा वाताय	३८	७
१४९.	सरोभ्यो धैवरमुपस्थाव०	३०	१६
१५०.	सविता प्रथमेऽहन्नग्नि०	३९	६

१५१. सहस्रशीर्षा पुरुषः सह०	३१	१
१५२. संधर्ये जारं गृहायोपपति०	३०	९
१५३. संभूतिं च विनाशं च	४०	११
१५४. सुपर्णं वस्ते मृगो अस्यादन्तो	२९	४८
१५५. सुमित्रिया न आप ओषध०	३८	२३
१५६. स्तीर्णं बर्हिः सुष्टरीमा	२९	४
१५७. स्वादुषꣳ सदः पितरो वयो०	२९	४६
१५८. स्वाहा पूष्णे शरसे स्वाहा	३८	१५
१५९. स्वाहा प्राणेभ्यः साधि०	३९	१
१६०. स्वाहा रुद्राय रुद्रहूतये	३८	१६
१६१. हिरण्मयेन पात्रेण	४०	१७
१६२. हिरण्यशृङ्गोऽयो अस्य	२९	२०

Appendix – II
Quotations in the *Ṛjubhāṣya*

(ऋ. = ऋग्वेदः, कौषी. = कौषीतकि उपनिषत्, छांदो. = छांदोग्योपनिषत्, पा.धा. = पाणिनिधातुपाठः, पा.सू. = पाणिनिसूत्रपाठः, बृह. = बृहदारण्यकोपनिषत्, मा. बृह. = माध्यंदिनिशतपथब्राह्मणम् बृहदारण्यकोपनिषत् , मा. शत. = माध्यंदिनिशतपथब्राह्मणम्, मुण्ड. = मुण्डकोपनिषत्, मैत्रा. = मैत्रायणी उपनिषत्, शु. य. = शुक्लयजुर्वेदः,)

Sr. No.	Quotation	Reference	Source
१.	अज गतिक्षेपणयोः	२९/५७	पा.धा.२३८
२.	अयमेव पुरुषो योऽयं पवते योऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य यदेषु लोकेष्वन्नन्तदस्यान्नं मेधः	३१/१	मा.श. (बृह.) १३/३/२/१
३.	अयं वै पूषा योऽयं पवते वायुः । एष हीद ꣳ सर्वं पुष्यति । एष उ प्राणः प्राणमेवास्मिन्नेतद्दधाति	३८/१५	मा. श. (बृह.) १४/२/१/९
४.	अशूङ् व्याप्तौ	२९/१	पा.धा. १३४६
५.	अहं ब्रह्मास्मि	४०/४	बृह. १/४/१०

६.	इच्छामसि इच्छमसि	३१/१/	–
७.	इतः प्रदानाद्धि देवा उपजीवन्ति	३१/२	–
८.	इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार	२९/५३	मा.श. १/२/४/१
९.	इषु इच्छायाम्	३१/२२	पा.धा. १४३९
१०.	ईश ऐश्वर्ये	४०/१	पा.धा.१०९०
११.	उष दाहे	२९/३७	पा.धा. ७४२
१२.	ऊधसोनङ् धनुषश्च	२९/३९	पा.सू.५/४/१३१-१३२
१३.	एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्च	४०/१७	बृह.३/८/११
१४.	एतस्य वा अक्षरस्य प्रशासने गार्गि	४०/१७	बृह. ३/८/९
१५.	कतम आत्मा	३१/१	बृह. ४/३/७
१६.	गृधु अभिकांक्षायाम्	४०/१	पा.धा. १३२६
१७.	ज्योतिर्वा इतरस्मिन् पयो (वायौ) भवति	३८/१६	–
१८.	तद्वा एतदक्षरं गार्गि अदृष्टं दृष्ट्ट	४०/१७	बृह. ३/८/११
१९.	तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन च	४०/२	मा.श. (बृह.) १४/७/२/२५
२०.	तान्वै मध्यमेऽहन्नालभत	३०/६०	–
२१.	त्रीणि पदानि गुहायाम्	३१/३	शु.य. ३४/४३
२२.	द्यावापृथिवी विधृते तिष्ठतः	४०/१७	बृह. ३/८/९
२३.	द्यावापृथिव्यादिमे हीद ५ सर्वमश्नुदाताम्	३१/२२	–
२४.	द्वा सुपर्णा सयुजा	३१/१	मुण्ड. ३/१/१
२५.	पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे	३१/१६	शु.य. ३४/४९
२६.	प्रतद्वोचे	३१/३	शु.य.३२/९
२७.	ब्रह्मणे ब्राह्मणम्	३१/१	शु.य. ३०/५
२८.	यज्ञेन यज्ञमयजन्त देवा	३१/९	शु.य. ३१/१६
२९.	यदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म	३१/३	बृह. २/५/१९
३०.	यान्वैतां सप्तपुरुषानेकं पुरुषमकुर्वन्	३१/९	–
३१.	ये प्रजापतिलोकमानन्दाः स एव ब्रह्मलोके आनन्दः	४०/१७	बृह. ४/३/३३

३२.	योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः	३१/१	बृह. ४/३/७
३३.	रथस्तृतीयं वा	२९/५३	मा.श. १/२/४/१
३४.	रथेन च शरेण च राजन्यबन्धव	२९/५३	मा.श. १/२/४/१
३५.	विज्ञानघनमानन्दं ब्रह्म	४०/१७	बृह. ३/९/२८
३६.	विज्ञानमानदं ब्रह्म	३१/२	बृह. ३/९/२८
३७.	वेनस्तत्पश्यन्निहितम्	३१/३	शु.य. ३२/८
३८.	शिजि अव्यक्ते शब्दे	२९/४०	पा.धा. १०९९
३९.	शीङ् स्वप्ने	३८/५	पा.धा. ११०६
४०.	शीर्षं छन्दसि	३१/१	पा.सू. ६/१/६०
४१.	ष्टुयै स्त्यै शब्दसंघातयोः	३८/१८	पा.धा. ९७७; ९७६
४२.	स एतं लोकमगच्छत्	३१/९	कौषी. १/३
४३.	सत्यसंकल्पः	४०/१७	मैत्रा. ७/७
४४.	स यो मनुष्याणा ᳪ राद्धः समृद्धो भवति	४०/१७	बृह. ४/३/३३
४५.	संख्यासुपूर्वस्य	३१/१	पा.सू. ५/४/१४०
४६.	सर्वं खल्विदं ब्रह्म	४०/५	छांद. ३/१४/१
४७.	सर्वं खल्विदं ब्रह्म ----- उपासीत	३१/२	छांद. ३/१४/१
४८.	सूर्यस्य वा एको रश्मिर्वृष्टिवनिर्नाम	३८/६	–
४९.	सूर्याचन्द्रमसौ धाता	३१/१६	ऋ. १०/१९०/३
५०.	ह्वल ह्मल चलने	३८/२०	पा.धा. ८५८; ८५९

Appendix - III

(III) Index of Authors and Works, mentioned in the *Ṛjubhāṣya*

Sr. No.		Reference
१.	केचित्	३१/३
२.	बृहदारण्यकम्	४०/२
३.	श्रुतिः	३१/९, ३१/२२, ३८/६, ३९/५